# Thiruvananthapuram Edl District

## Sanskrit Answerkey 1

**STD X**

पाठः१

आयुरारोग्यसौख्यम्।



## प्रवर्तनम् १

**कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत।**

१.भूगतौ अश्विनीसुतौ  कौ?

( परिश्रमो मिताहार:)

२.सुखदु:खयोः कर्ता कः?

(आत्मा )

३.चरकेन विरचितं ग्रन्थं किम् ?

( चरकसंहिता )

४.लाभानां श्रेष्ठं किम्?

(आरोग्यम् )

५.इतिहासकाव्यं किम् ?

( महाभारतम् )

## प्रवर्तनम् २

**उदाहरणानुसारं समानार्थकपदानि कोष्ठकात् निर्धार्य लिखत ।**

( व्यायामः, आरोग्यं, सामर्थ्यं, लुब्धः)

| | |
|---|---|
| उदा: दाक्ष्यम् | सामर्थ्यम् |
| लोलुपः | लुब्धः |
| स्वास्थ्यम् | आरोग्यं |
| परिश्रमः | व्यायामः |

TVM EDL DIST

## प्रवर्तनम् ३

**छात्राः यूयं श्लोकेषु विद्यमानानां सन्धियुक्त पदानां पदच्छेदं कृतवन्तः खलु। एवं अधोदत्तपदानां अपि पदच्छेदं कुर्वन्तु ।**

**उदा:- नैव = न + एव।**

तेनैव= तेन + एव ।

चैव = च + एव ।

अत्रैव= अत्र + एव।

तत्रैव= तत्र + एव ।

उदा:- **तावनादृत्य = तौ + अनादृत्य।**

उभावपि= उभौ + अपि ।

नायकावपि= नायकौ + अपि।

तावपि = तौ + अपि ।

## प्रवर्तनम् ४

**उदाहरणानुसारम् एकपदं लिखत।**

**उदा:- मितश्च असौ आहारः च - मिताहारः।**

हितश्च असौ आहारः च - हिताहारः।

TVM EDL DIST

## प्रवर्तनम् ५

**उदाहरणानुसारं विग्रहवाक्यं लिखत।**

उदाः- **सुखदुःखे - सुखं च दुःखं च सुखदुःखे।**

शीतोष्णे- शीतं च उष्णं च शीतोष्णे।

## प्रवर्तनम् ६

**आत्मानमेव मन्येत**

**कर्तारं सुखदुःखयोः।**

**तस्माच्छ्रेयस्करं मार्गं**

**प्रतिपद्येत न त्रसेत् ।।**

**कोष्ठकात् उचितपदानि स्वीकृत्य श्लोकस्य आशयं लिखत।**

**(दुःखस्य, नास्ति, मार्गं,कर्म,भयस्य)**

**जीविते सुखस्य दुःखस्यच हेतुः स्वस्य कर्म एवेति अवगच्छेत्।एवं तर्हि महत्तरं मार्गं प्राप्नुयात् । एतत् विषये भयस्य आवश्यकता नास्ति इत्याशयः।**

## प्रवर्तनम् ७

**प्रियछात्राः श्लोकात् अधोदत्तानां प्रश्नानाम् उत्तराणि दातुं शक्यन्ते वा ? श्रमं कुर्वन्तु ।**

**धन्यानामुत्तमं दाक्ष्यं**
**धनानामुत्तमं श्रुतम्।**
**लाभानां श्रेष्ठमारोग्यं**
**सुखानां तुष्टिरुत्तमा।।**

क) धनानामुत्तमं किम् ?

TVM EDL DIST

श्रुतम् ।

ख) ' तृप्तिः' इत्यर्थकं पदं श्लोकात् चित्वा लिखत ।

तुष्टिः।

ग) ' श्रेष्ठमारोग्यम् ' इति पदं विश्लेषयत ।

श्रेष्ठम् + आरोग्यम् ।

घ) लाभानां श्रेष्ठं किम् ?

आरोग्यम् ।

## प्रवर्तनम् ८

आत्मानमेव मन्येत
कर्तारं सुखदुःखयोः ।
तस्माच्छ्रेयस्करं मार्गं
प्रतिपद्येत न त्रसेत् ।।

ईर्ष्याभयक्रोधसमन्वितेन
लुब्धेन रुग्दैन्यनिपीडितेन।
विद्वेषयुक्तेन च सेव्यमानम्
अन्नं न सम्यक् परिपाकमेति।।

" **भोजनावसरे ईर्ष्यादिभावनां विहाय स्वस्थःभवेत्** "। आशयमिमं कस्य श्लोकस्य इति विवेचयतु ।

ईर्ष्याभयक्रोधसमन्वितेन
लुब्धेन रुग्दैन्यनिपीडितेन।
विद्वेषयुक्तेन च सेव्यमानम्
अन्नं न सम्यक् परिपाकमेति।।

TVM EDL DIST

## प्रवर्तनम् ९

**पाठभागस्थानां श्लोकानां अवगमनाय गद्यरूपेण परिवर्तनम्**

**करणीयम्।अधोदत्तानि सूचनान्युपयुज्य गद्यरूपेण लिखत।**

कः) परिश्रमः मिताहारःभूगतौ अश्विनीसुतौ तौ अनादृत्य अन्यं वैद्यम् अहं नैव समाश्रये ।

(समाश्रये, मिताहारः, अनादृत्य, अश्विनीसुतौ)

ख)अर्थःशनैः पन्थाःशनैःशनैःपर्वतम् आरुहेत् विद्या शनैःधर्मः शनैःच शनैः व्यायामःच।

(विद्या,धर्मः, अर्थः, व्यायामः,पर्वतम्, पन्थाः)

## प्रवर्तनम् १०

परिश्रमो मिताहारो
भूगतावश्विनीसुतौ ।
तावनादृत्य नैवाहं
वैद्यमन्यं समाश्रये।।

**छात्रा ! अयं श्लोकः उत्तमः खलु । श्लोकस्य आशयमपि अत्युत्तमम्। श्लोकस्य आस्वादनटिप्पणीं लिखिष्यामः वा ? अधोदत्तानि सूचकान्यपि यथोचितम् उपयोक्तव्यम् ।**

- **अश्विनीकुमारौ अनादृत्य अहम् अन्यं वैद्यं न समाश्रये ।**
- **परिश्रमस्य मिताहारस्य च आवश्यकता वर्णयति ।**
- **परिश्रमः मिताहारः भूगतौ अश्विनीसुतौ भवतः ।**
- **ऐतरेयब्राह्मणात् उद्धृतः अयं श्लोकः ।**

TVM EDL DIST

- **लोकोपकारप्रदः आशयः एव ।**
- **अतः एतत् श्लोकः मम इष्टतमश्लोकः भवति ।**
- **ये जनाः व्यायामः आहारमितत्वं च अनुशीलयन्ति तेषां कृते अन्यस्य वैद्यस्य आवश्यकता नास्ति।**

**परिश्रमः मिताहारः भूगतौ अश्विनीसुतौ भवतः।अश्विनीसुतौ अनादृत्य अहम् अन्यं वैद्यं न समाश्रये । ये जनाः व्यायामः आहारमितत्वं च अनुशीलयन्ति तेषां कृते अन्यस्य वैद्यस्य आवश्यकता नास्ति । लोकोपकारप्रदः आशयः एव । अतः अयं श्लोकः मम इष्टतमः भवति ।**

TVM EDL DIST